# मनुस्मृत्युक्तदिशा स्त्रीसंग्रहणम्

ड. विश्वजित्पालः

नवपल्ली जे.सि.एस. उच्चविद्यालयः, मुर्शिदावादः, प.वङ्गः

मो. 9641995020, ई मेलः palbiswajit70@gmail.com

धर्मार्थकाममोक्षाख्येषु सर्वेषु पुरुषार्थेषु मनुष्यजीवनस्य मार्गप्रवर्त्तकरुपेण तथा नियत्रकरूपेण धर्मस्यैव प्राधान्यं स्वीक्रियते। अनित्येऽपि संसारे धर्मस्यैव नित्यत्वं सर्वैरनुभूयते। अतस्तत्प्रतिपादकशास्त्रत्वेन धर्मशास्त्रस्य गुरुत्वमत्यन्तमावहति। धर्मशास्त्रं मानवचरित्रस्यापि नियन्त्रकम्। मनुष्यः स्वाभिलषितपदार्थान् यस्मात् प्राप्तुं शक्नोति तत्प्रतिपादनमेव धर्मशास्त्रस्योद्देश्यम्। धर्मः श्रौतस्मार्तभेदेन द्विधा विभक्तः। स्मार्तधर्म एव धर्मशास्त्रस्य विषयीभूतः। धर्मशास्त्रस्यान्यत् नाम स्मृतिशास्त्रमिति। सूत्रसाहित्यपरवर्तीकाले श्रुतिवाक्यमथितवैदिकाचार-व्यवहाराननुस्मरन् विरचितत्वाद् धर्मशात्रं स्मृतिशास्त्रमिति नाम्नाभिधीयते।

स्मृतिशास्त्रप्रणेतॄणां मध्ये आचार्यमनोः स्मृतिशास्त्रेषु च मनुस्मृतेः प्राचीनत्वं विशालत्वं प्राधान्यमौदार्यञ्च सर्वैर्निर्विवादमुद्घोषितम्। सर्वजनप्रियस्मृतिरेषा।

धर्मशास्त्रस्य विषया आचारव्यवहारप्रायश्चित्तभेदेन त्रिधा विभज्यन्ते। तत्र आचारभागे ब्राह्मणादिचतुर्वर्णानां गार्हस्थादिचतुराश्रमाणाञ्च पालनीयकर्तव्यकर्मणामालोचना अस्ति। व्यवहारभागे दण्डनीतेः प्रयोगपद्धतिमुल्लिख्य दुराचाराणां संशोधनोपाय उल्लिखितो भवति।

प्रायश्चित्तभागे ब्रह्मबधादिविविधपापकर्मणां प्रायश्चित्तविधानमस्ति। स्मृतिशास्त्रत्वात् मनुस्मृतेर्विषयोऽप्याचारव्यवहारप्रायश्चित्तभेदेन त्रिधा विभक्तः।

मनुस्मृतेरष्टमाध्याये विवादस्थानानामष्टादशत्वं मनुस्मृतिकारेण स्वीकृतम्। तत्र पञ्चदशसंख्यकविवादस्थानरूपेण ‘स्त्रीसंग्रहणम्’ इति विवादपदं भगवता मनुना समर्थितम्। विवाहसंस्कारवहिर्भूते परदारसम्भोगे प्रवृत्तिजातो विवादः स्त्रीसंग्रहविवाद इत्यभिधीयते। परदाराभिमर्षणे प्रवृत्तस्य जनस्य नासौष्ठधेदनादिभिरुद्वेजनकदण्डेन चिह्नितं कृत्वा राजा तं राष्ट्रान्निर्वासयेत्। तथा चोक्तं मनुस्मृतिकारेण–

परदाराभिमर्शेषु प्रवृत्तान्नृन्महीपतिः।

उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत्।। (मनुस्मृति 8.352) इति।

परदारगमने समाजे वर्णसङ्कर उत्पद्यते। तस्माच्च जगन्मूलविनाशकोऽधर्मो सृष्टेर्विनाशं साधयति। यथा चोक्तं मन्वर्थमुक्तावल्यां – यस्मात्परदाराभिगमनात्संभूतो वर्णस्य संकरः संपद्यते। येन वर्णसंकरेण विशुद्धपत्नीकयजमानाभावात् "आग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठति" (अ.३ श्लो.७६) अस्याभावे सति वृष्ट्याख्यजगन्मूलविनाशोऽधर्मो जगन्नाशाय संपद्यते (मन्वर्थमुक्तावली 8.353) इति।

परस्त्रीसम्भाषणदोषदुष्टजनो यथोचितकारणव्यतिरेकेण परभार्यया सह सम्भाषते चेद्राजा प्रथमसाहसेन सार्धाधिकद्विशतपणेन वा तं दण्डयेत्।

नदीतडागादेर्जलानयनकाले मार्गारण्यादिनिर्जनप्रदेशे परदारेण सम्भाषते चेत् सहस्रपणं दण्डं प्राप्नुयात्। स्रक्चन्दनाद्युपचारेण निःसम्पर्कितस्याः स्त्रिय उपकारसाधनं तया सह केलिस्तस्या वस्त्रालङ्कारादिस्पर्शनमेकखट्वासनमिच्छापूर्वकमस्थानस्पर्शनं स्पर्शनोपेक्षणञ्च सर्वं संग्रहणमिति विविच्यते। चतुर्वर्णिकैः सर्वदा स्वस्त्रीरक्षणमवश्यकर्तव्यम्। ब्राह्मणेतरवर्णिकोऽकामां ब्राह्मणीं प्रति संग्रहणापराधं करोति चेद्राजा तस्य प्राणदण्डं विदध्यात्। स्वामिनिषिद्धस्त्रीभिः सह सम्भाषणं न कर्तव्यम्। प्रतिषिद्धसंभाषणकारिणं राजा षोडशमाषात्मकसुवर्णेन दण्डयेत्।

समानजातीयामकामां कन्यां गच्छति चेत् तत्क्षणादेव तस्य लिङ्गच्छेदनादिबधदण्डो भवति। इच्छन्तीं कन्यां गच्छति चेत् तत्र बधदण्डो न भवतीति। काचित् कन्या जातिधनसदाचारविद्यायां स्वस्मादुत्कृष्टपुरुषं भजति चेत् कन्याया स्वातन्त्र्यहीनत्वात् तस्या अभिभावकस्य नार्थदण्डो भवेत्। हीनपुरुषं तु भजति चेत् तस्मान्निवृत्य पितृगृहे सा स्थापनीया यावत् सा निवृत्तिकामा स्यात्। हीनजातिः पुरुष उत्कृष्टजातीयां कन्यामिच्छन्तीमनिच्छन्तीं वा गच्छति स अङ्गुलिच्छेदनमारणात्मकं बधं प्राप्नोति। कश्चित् समानजातीयामिच्छन्तीं कन्यां गच्छति चेत् स कन्यायाः पित्रे शुल्कानुरूपमर्थं दद्यात् न च दण्डमिति। मन्वर्थमुक्तावलीकारेणोक्तम् – सा च कन्या तेनैव वोढव्या (मन्वर्थमुक्तावली 8.366) इति।

यो बलात् समानजातीयायाः स्त्रियो जननाङ्गे अहङ्कारवशादङ्गुलिप्रवेशनेन तस्याः कन्यात्वं नाशयति राजा तस्याङ्गुलिद्वयं शीघ्रं छेदयेत् पणषट्शतानि च दण्डं दापयेत्। यः समानजातिरिच्छन्तीं कन्यामङ्गुलिप्रक्षेपमत्रेण नाशयति स नङ्गुलिच्छेदनं प्राप्नोति। तत्कर्मणि प्रसक्तिनिवाराणाय

राजा तं द्विशतपणेन दण्डयेत्। काचित् कन्या अङ्गुलि-प्रक्षेपेणापरकन्यायाः कन्यात्वं नाशयति चेद्राजा तां द्विशतपणेन दण्डयेत्। सा च द्विगुणशुल्कं कन्यायाः पित्रे दद्यात् शिफाप्रहारांश्च दश प्राप्नुयात्।

अधिकवयःसम्पन्ना स्त्रीरल्पवयःसम्पन्नायाः कन्यायाः कन्यात्वं नाशयति चेत् तस्या दण्डरूपेण ब्राह्मणजातीया सा शिरोमुण्डनमाप्नोति क्षत्रियजातीया अङ्गुल्योरेव छेदनं वैश्यजातीया च सा गर्दभेण च राजमार्गे वहनमर्हतीति। पितृकुलस्य ज्ञातिवर्गस्य च धनैश्वर्यदर्पेण स्वीयसौन्दर्यादिगुणदर्पेण वा स्वपतिं परित्यज्य पुरुषान्तरं गच्छति चेद्राजा तां बहुजनाकीर्णे प्रदेशे श्वभिर्भक्षयेत्। तथा चोक्तं मनुस्मृतिकारेण –

भर्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते।। (मनुस्मृति 8.371)
इति।

तं च पापकारिणं परपुरुषं लौहशय्यायां स्थापयित्वा दहेत् काष्ठञ्च निःक्षेपेद्राजा यावत् स दग्धः स्यात्। संवत्सरातिक्रमे पुनः परस्त्रीगमनदोषदुष्टो भवति चेत्स पूर्वदण्डाद् द्विगुणदण्डमर्हति। शूद्रो भर्त्रादिभीरक्षितामरक्षितां वा द्विजातिस्त्रियं गच्छति चेद् दण्डरूपेण स सर्वस्वहरणं लिङ्गच्छेदनञ्च प्राप्नोति। रक्षितनारीसम्भोगे तु शूद्रस्य सर्वस्वहरणेन सह मारणदण्डो विधेयः। केनचिद्वैश्येन रहसि रक्षितब्राह्मणीसम्भोगे वर्षकालं कारावासः सर्वस्वहरणञ्च कार्यम्। केनचित् क्षत्रियेण च रहसि रक्षितब्राह्मणीगमने राजा तं सहस्रपणं दण्ड्याद् गर्दभमूत्रेण चास्य मस्तकमुण्डनमपि विधेयम्। अरक्षितब्राह्मणीगमने वैश्यः पणपञ्चशतानि क्षत्रियश्च पणसहस्रं दण्डं प्राप्नोति।

कश्चिद् वैश्यः क्षत्रियो वा बलाद् गुणवतीं रक्षितब्राह्मणनारीं गच्छति चेत् तावुभावपि बधदण्डं प्राप्नुतः कुशकाशादिकटेनावेष्ट्य वा तौ दग्धव्यौ।

केनचिद् ब्राह्मणेन बलात् रक्षितब्राह्मणीगमने स ब्राह्मणः पणसहस्रं दण्डं प्राप्नोति। ब्राह्मण्या इच्छायां सकृन्मैथुने स ब्राह्मणः पणपञ्चशतं दण्डं लभते। प्राणदण्डयोग्यापराधेऽपि राजा ब्राह्मणान् कदाचिन्न हन्यात्। तेषां सर्वस्वमपहृत्य अक्षतशरीरान् तान् ब्राह्मणान् राष्ट्रान्निर्वासयेदिति विधानं शास्त्रसम्मतम्। शास्त्रेषु क्षत्रियवैश्यशूद्राणान्तु बधदण्डो विधेयः। पृथिव्यां यतो ब्राह्मणवधान्महत्तरोऽधर्मो नास्ति ततो राजा सर्वपापाचारिणो ब्राह्मणस्य बधं मनसापि न

चिन्तयेत्। तथा हि –

न ब्राह्मणवधाद्भूयानधर्मो विद्यते भुवि।
तस्मादस्य बधं राजा मनसापि न चिन्तयेत्।। (मनुस्मृति 8. 381)
इति।

वैश्यो रक्षितक्षत्रियां गच्छति चेत् स दण्डरूपेण पणपञ्चशतानि प्राप्नुयात्। क्षत्रियश्च रक्षितवैश्यां गच्छति चेत्स क्षत्रियः पणसहस्रं दण्डमर्हति। ब्राह्मणः क्षत्रियां वैश्यां वा रक्षितां नारीं गच्छति चेत् तत्र तस्य सहस्रपणमर्थदण्डं भवेत्। क्षत्रियेण वैश्येन वा रक्षितशूद्रागमने सहस्रमेव दण्डःस्यात्। वैश्येनारक्षितक्षत्रियागमने पणपञ्चशतान्यर्थदण्डो भवेत्। केनचित् क्षत्रियेणारक्षितक्षत्रियागमने च गर्दभमूत्रेण मुण्डनं पणपञ्चशतानि वा दण्डो भवेदिति। ब्राह्मणेनारक्षितक्षत्रियागमने वैश्यागमने शूद्रागमने वा पणपञ्चाशतान्यर्थदण्डो भवेत्। चण्डालश्वपचाद्यन्तजनारीगमने च पणसहस्रं दण्डो कार्यः। यस्मिन् राज्ये चौरः परस्त्रीगामी वाक्पारुष्यकारी दण्डपारुष्यकारी साहसकारी च न विद्यते स राजा इन्द्रलोकं याति। तथा चोक्तं मनुस्मृतिकारेण —

यस्य स्तेनः पुरे नास्ति नान्यस्त्रीगो न दृष्टवाक्।
न साहसिकदण्डघ्नौ स राजा शक्रलोकभाक् ।। (मनुस्मृति 8.386) इति।

अस्मिन्विषये मन्वर्थमुक्तावल्यां कुल्लुकभट्टाचार्येणोक्तम् — यस्य राज्ञो राष्ट्रे चौरः, परदारगामी, पुरुषवादी, गृहदाहादिसाहसकारी, दण्डपारुष्यकर्ता च नास्ति स राजा शक्रपुरं याति (मन्वर्थमुक्तावली 8.386) इति। एतेषां स्तेनादिपञ्चविधानामपराधीनां निग्रहकारी राजा समानजातीयेषु राजसु मध्येऽप्याधिपत्यं तनोति जनसमाजे यशश्च लभते इति।

वर्तमाने समाजपरिवर्तनेन सह सुष्ठुरूपेण समाजपरिचालनार्थं सर्वजनग्राह्यं शासनं प्रवर्तनाय च मन्वादिस्मृतिशास्त्रोक्तव्यावहारविधानेषु किञ्चित् परिमार्जनं क्रियते।

वर्तमाने यदि कश्चित् कस्या चिन्नार्योऽनिच्छायां तां सम्भोगार्थमभिगच्छति वस्त्रं च त्याजयति तर्हि भारतीयदण्डविधेश्चतुःपञ्चाशदधिकत्रिशततमधारायाः क ख इति विभागानुसारेण (Indian Penal Code 1860, Chapter xvi, Section 354A, 354B) अनधिकं वर्षत्रयमनधिकं

सप्तवत्सरञ्चार्थदण्डेन सह कारावासं प्राप्नोति। नार्योऽनिच्छायां बलपूर्वकसम्भोगे भारतीयदण्डविधेः षट्सप्तत्यधिकत्रिशततमधारानुसारेण (Indian Penal Code 1860, Chapter xvi, Section 376) अनधिकं सप्तवत्सरं यावज्जीवनं वार्थदण्डेन सह कारावासो भवति। याज्ञवल्क्यस्मृत्यनुसारेण बहवः पुरुषाः काञ्चिदेकामनिच्छन्तीमपि नारीं बलपूर्वकमभिगच्छन्ति चेत्ते पृथग्भावेन चतुर्विंशतिपणान् दण्डनीयाः।

कस्याश्चित् नार्योऽनिच्छायां बलाद् बहुजनैर्मिलितभावेन सम्भोगे भारतीयदण्डविधेः षट्सप्तत्यधिकत्रिशततमधाराया घविभागानुसारेण (Indian Penal Code 1860, Chapter xvi, Section 376D) तस्यार्थदण्डेन विंशतिवर्षादधिकः कारावासो भवति।

वर्तमाने स्वामिनोऽनिच्छायामपि कश्चित्तस्य भार्याया इच्छानुसारेण तां प्रति सम्भोगार्थमभिगच्छति सम्भोगं वा करोति चेत् स सम्भोगकर्ता भारतीयदण्डविधेः सप्तनवत्यधिकचतुः- शततमधारानुसारेण (Indian Penal Code 1860, Chapter XX, Section 497) अनधिकं पञ्चवत्सरं यावदर्थदण्डेन सह कारावासमर्हति। सा नारी तु दण्डार्हा न भवतीति।

❖ ❖ ❖

## सन्दर्भितसहायकग्रन्थाः

## (Bibliography)

### सन्दर्भितसंस्कृतभाषोपनिबद्धा ग्रन्थाः


- उपाध्यायः, वाचस्पतिः, धर्मशास्त्रस्य संग्रहः, नवरङ्, दिल्ली, 1982.
- गुप्ता, ड. पुष्पा, वैदिकसंकलनम्, चौखम्बा सुरभारतीप्रकाशनम्, वाराणसी, 2008.
- झा. पं. विश्वनाथ, अमरकोशः, मोतीलालबनारसीदासः, वाराणसी, 2007.

- दाहालः, आचार्यलोकमणिः, संस्कृतसाहित्येतिहासः, चौखम्बा कृष्णदासअकादमी, वाराणसी, 2005.
- नीलकन्ठः, व्यवहारमयूखः, राष्ट्रीयसंस्कृतसंस्थानम्, नईदिल्ली, 2009.
- मिश्रः, कुलमणिः, धर्मशास्त्रशब्दकोषः, ओडिशाराज्यपर्यटनक्रीडासंस्कृतिनिर्देशनालयः 1981.
- मिश्रः, प्रो. जयकृष्ण :, धर्मशास्त्रस्येतिहासः, चौखम्बासंस्कृतसिरिज्अफिस्, वाराणसी, 2010.
- विद्यारत्नः, काशाचन्द्रः, मनुसंहिता, राष्ट्रियसंस्कृतसंस्थानम्, नईदिल्ली, 2012.
- शर्मा, हरगोविन्दः, मनुसंहिता, चौखम्बाविद्याभवनम्, वाराणसी, 2006.
- शास्त्री, आचार्यजगदीशलालः, मनुस्मृतिः, मोतिलालबनारसीदासः, दिल्ली, 2010.
- सिंहः, नागशरणः, स्मृतिसन्दर्भः, नागप्रकाशकः, दिल्ली, 1993.
- सोयाइन, वि.के., स्मृतिमीमांसा, अक्षयप्रकाशनम्, दिल्ली, 2006.


**सन्दर्भितवङ्गभाषोपनिबद्धा ग्रन्था :**


- अनिर्वाण, वैदिकसाहित्य (वेदमीमांसा), संस्कृत बुक डिपो, 2006.
- पाहाडी, अध्यापक अन्नदाशंकर, मनुसंहिता, संस्कृत बुक डिपो, कोलकाता, 2004.
- भट्टाचार्य्य, विमानचंद्र, संस्कृत साहित्येर रूपरेखा, बुक वर्ल्ड, 2004.
- वन्द्योपाध्याय, ड. मानवेन्दु, मनुसंहिता, संस्कृत पुस्तक भण्डार, कोलकाता,1410.
- वन्द्योपाध्याय, ड. श्रीमती शांति, वैदिक साहित्येर रूपरेखा, संस्कृत पुस्तक भंडार, कोलकाता, 2003
- वन्द्योपाध्याय, सुरेशचन्द्र, मनुसंहिता, आनन्द पावलिसार्स, कोलकाता, 2000.
- भट्टाचार्य, जनेशरंजन, धर्मशास्त्रेर संक्षिप्त इतिहास (धर्म, अर्थ, नीति), वि.एन. पव्लिकेशन, कोलकाता, 2016.
- ल'म्यान, वांला पुलिश हैन्डबुक, ल'म्यान पब्लिशिंग हाउस, कोलकाता, 2011.
- ल'म्यान, भारतीय साक्ष्य आइन, कोलकाता, 1999.

## सन्दर्भित-आङ्गलभाषोपनिबद्धा ग्रन्थाः


- Banerjee, Nikunja V., Studies in Dharmasastra of Manu, Munshiram Manoharlal, New Delhi, 1980.
- Bhandarkar, Sri Ramkrishna Gopal, First Book of Sanskrit, Low Price Publications, Delhi, 2004.
- Bhandarkar, Sri Ramkrishna Gopal, Second Book of Sanskrit, Low Price Publications, Delhi, 2000.
- Kane, Dr. Panduranga Vamana, History of Dharmasastra : Ancient and Medieval Religious and Civil Law in India, Government Oriental Series, Bhandarkar Oriental Research Institute, Pune, 1962.
- Manusamhita : with Nine Commentaries, Bharatiya Vidya Bhavan, Bombay, 1978.
- Mukhopadhyaya, Govindagopal, A New Trilingual Dictionary, Milan Publications, Gaziabad, 2002.
- Olivelle, Dharmasutras : The Law codes of Ancient India, Oxford University Press, 1999.
- Swain, Brajakishore, Dharmasastra : A link between tradition and Modarnity, Chowkhamba Sanskrit Bhavan, Varanasi, 2003.
- Swain, Brajakishore, The Dharmasastra, An Intraductory Analysis, Akshaya Prakashan, Delhi, 2011.


❖ ❖ ❖